International Journal of Sanskrit Research 2017; 3(1): 66-69

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(1): 66-69
© 2017 IJSR
www.anantaajournal.com
Received: 15-11-2016
Accepted: 16-12-2016

**श्री प्रकाश: गोगिकार:**
उपन्यासक: श्रीविश्वेश्वर संस्कृतान्ध्र कलाशाला, वरंगल्, तेलंगाण

Correspondence
**श्री प्रकाश: गोगिकार:**
उपन्यासक: श्रीविश्वेश्वर संस्कृतान्ध्र कलाशाला, वरंगल्, तेलंगाण

# श्री विवेकानन्द प्रतिपादित विग्रहाराधन वैशिष्ट्यम्

**श्री प्रकाश: गोगिकार:**

**प्रस्तावना**

प्रपञ्चदेशेषु भारतदेशौन्नत्यं उद्घोष्य, हैन्दवसंस्कृते: वैशिष्ट्यं उद्बोध्य, देशस्य महतीं ख्यातिं समर्पितवतां स्वामिनां सार्थकनामधेयानां विवेकानन्दानां गुरुवन्दनं वितीर्य तै: करतलामलकवत् बोधितविषयेषु प्रख्यात विग्रहाराधन विषयं संस्थापयितुं प्रयते।

संस्कृत भाषायामनर्गल भाषणसौष्टवयुतानां विवेकानन्दानां चरितं संस्कृतभाषायामेव लेखनीय: तद्वारा तेभ्य: अजरामरकृतज्ञता देशस्य महतीं दत्ता भवतीति आन्ध्रदेशीयै: श्रीमद्भि: सन्निधानं सूर्यनारायण शास्त्रि महाभागै: एकं पद्यात्मकं खण्डकाव्यं ग्रथितं असीत्। तदेव “विवेकानन्दम्” काव्यम्। श्री सन्निधानं सूर्यनारायण महाशया: विंशति शताब्दीय संस्क्रुत कर्तृषुविख्याता:। एते संस्कृतान्ध्रभाषयो: कविपण्डिता: पण्डितकवयश्च। संस्कृतान्ध्रभाषाप्रवीणा: एते अनेकविद्यालयेषु, कलाशालासु च संस्कृतान्ध्र सुबोधनद्वारा उत्तमगुरव: सञ्जाता:। एते अनेके गद्यपद्यग्रन्थानां स्वतन्त्ररचनां कृत्वा,अपि च बहूनां अनुवादग्रन्थानां स्वतन्त्रग्रन्था इव ग्रथनं कृत्वा सुप्रसिद्धतांगता: कविकुलगुरुमण्डले।

**विवेकानन्द: आल्वारनगरे सञ्चार।**

विवेकानन्दनाम्ना सार्थक: नरेन्द्र: भस्मावगूढोज्ज्वलवह्निकल्प: संकुचितस्फुट: भुजङ्गम: निगूढतेजा: सन्न्यासिवेषधारी देशाटनं कुर्वन्नास्ते:। एकदा यतीश्वर: नरेन्द्र: पुण्यफलेन पङ्गो: समीपं गङ्गैव यथा आगच्छति तथा आल्वार् राज्ञ: समीपमेवागत:। स नगरवीथीषु सञ्चरति। तदा पुरप्रजा: विनम्रा: भक्तिप्रपूर्णा: करकमलपूजां कुर्वन्त: स्वागतं व्याजह्रु:। पुण्यावताररूपिणं साधुं नरेन्द्रं दृष्ट्वा धन्यतां मन्यमाना: जना: प्रवाह इव तं संदद्रुशु:। कृष्णस्य वेणुनादेन व्रजस्था इव वत्सेशस्य वीणास्वरेण गजेन्द्रा: नागस्वरेण सरीसृपा: इव जना: तस्य बोधनामृत पान पवित्रिता: मुग्धमनोहरा बभूवु:। गुडस्य पिपीलिका: इव सुगन्धसुमानां भृङ्गा इव पुरप्रजा: अहोरात्रं रुच्यं बोधामृतं पिबन्ति।

**खण्डं गुडस्येव पिपीलिकौघ: पुष्पं सुगन्धीव च चञ्चरीक:।**
**दिवानिशं तं परिवृत्य पौरा: पिबन्ति बोधामृतस्य रुच्यम्॥१**

**आल्वारुराजा विवेकानन्दं निन्दयामास।**

एकदा आल्वारनृपस्य सचिवा: स्वप्रजापतिरपि अस्य बोधं श्रुत्वा नास्तिक्यबुद्धे: आस्तिको भवतु इति चिन्तयित्वा राजां बहुधा संप्रार्थ्य सन्न्यासि विवेकानन्दं समीपं आनैषु:। राजा कुटिलतया भक्तिभावळ् नटन् नरेन्द्रं “त्व शास्त्राध्यैषी इति श्रुतम्।

तथपि क्षुद्रजीवनं करोषि। जनयाचत्रां कुर्वन् स्वाभिमानं त्यजसि।

**नान्धो न् पङ्गु: न च मूकवान्वं योऽर्हन्ति भिक्षामटितुं न चान्ये।**
**महाबलो मल्ल इवावभासि श्राम्यन् शरीरेण धनं लभेथा:॥२**

त्वं न अन्ध:, न वा पङ्गु:, न वा मूक: ते एव याचनार्हा:। इतरे भिक्षाटनाय नार्हा:। युद्धे मल्ल इव बलशाली भवान् याचनाय शरीरश्रमं विना धनमार्जयति। काषायवेषेण जनान् वञ्चयित्वा धूर्त इव सञ्चरसि। इति कठिनवचोभि: निन्दाभाषणेन नरेन्द्रं दूषयामास।

**विवेकानन्द: आल्वार राज्ञ: ज्ञानप्रदानम्।**
सन्न्यासी नरेन्द्र: नृपेन्द्रस्य दूषणवाक्यानि श्रुत्वा "हे राजन् त्वं मधुमत्त: विलासै प्रजानां श्रेय: त्यक्त्वा सञ्चरसि"।

**कुतो धनं त्वं व्ययस्यशं को वारीव किं तत्समुपार्जितं भो:।**
**त्वयास्य देहस्य परिश्रमेण भोक्तुं प्रजास्वं कथमर्हसीति॥३**

अपि च निश्शङ्कं धनं जलमिव व्ययीकरोषि। तद्धनं त्वया समुपार्जितं वा? प्रजाधनानुभवाय त्वं कथमर्हसि इति राजानं त्रुणीकुर्वन् बभाषे।
नरेन्द्रवाक्यानि श्रुत्वा सचिव बिभेषिरे। तथापि नरेन्द्र: राजानं पुन: अहं तव न याचक:। त्वत्त: काणवराटिकापि अहं न गृह्णामि।

**तृणं च मेरुश्च ममैकरूपो नापेक्ष्यते तुच्छसुखं च तन्वा:।४**
मम तृणं हेमगिरिर्मेरुर्वा समान:। शरीरस्य तुच्छसुखानि न वाञ्छे।

**गुर्वाज्ञया त्वादृशमत्तचित्तान् गर्ह्यान् दुराचरपरान् प्रबोध्य।**
**लोकस्य कल्याणविधित्सयैव चरामि देशान् न प्रलोभात्॥५**

अहं गुरोराज्ञय त्वादृशान् मत्तचित्तान्, जर्वेण् दुराचारपरान् प्रबुध्य लोककल्याणं वाञ्छन् देशाटनं करोमि: धनाशया न चरामि\ त्वं परेषां रन्ध्रान्वेषक:। त्वं प्रथमत: तव रन्ध्रंछादय। यस्मिन् यामलूरौ यादृश: भुजङ्गम: निवसतीति न जानीम: तद्भुजग: स्वफणै: कं दशतीति न विद्म:। इति समादधे।

**आल्वार राजा प्रतिमाराधनं प्रति प्रपच्छ।**
राजा नरेन्द्रस्य निरीहवचांसि श्रुत्वा मुहूर्तं मौनेन स्तित्वा..

**न् क्रैस्तवा नापि महम्मदीया: कुर्वन्ति मूर्त्यर्चनमीश्वरस्य।**
**शिलामयीं काष्टमयीं च मूर्तिं किमश्रुतेऽर्चन् फलमज्ञलोक:॥६**

हे साधो! जना: जीवरहितप्रतिमां पूजयन्ति इतर क्रैस्तव महम्मदीया:
तथा न कुर्वन्ति। शास्त्रं "भगवान् रूपरहित: इति भगवद्रहित प्रदेशोऽपि नास्तीति भगवान् सर्वत्र चरति" इति वदति। शिलामये काष्टमये भगवदाराधकान् मूर्खजनान् दृष्ट्वा व्रीडामि। इति अभणत्।

**नरेन्द्र: प्रतिमाराधनं उपदिदेश।**
रज्ञ: वाक्यानि श्रुत्वा नरेन्द्र: मनसा दैवं संप्रार्थ्य राज्ञ: चित्रपटं करे धृत्वा राजसेवकानाहूय "यूयं अस्मिन् चित्रपटे निष्टीवनं कुरुत" इत्यवदत्। किन्तु ते तथा कर्तुं निराकुर्वन्। तदा विवेकानन्दस्वामी "भो: चित्रपटे निष्टीवनं कर्तुं भवन्त: भयमाप्नुवन्ति। इदं निर्जावचित्रं खलु! अत्र
निष्टीवनेन राज्ञ: मुखे निष्टीवन कृतं भवेदिति सम्भावयन्ति। अत्र राज्ञ: बिम्बं नास्ति। प्रतिबिम्बमेव खलु!" इत्यवदत्।
स्वामि वाक्यानि श्रुत्वा मन्त्रिण: राज्ञ: भीता: विवेकानन्दस्वामिनं प्रति "स्वामिन्! भवन्त: अस्मत्प्रभो: चित्रं दूषयन्ति?

**शूलायते न: श्रवणोर्वस्ते सहयं न सुश्लोक इलापतिर्न:।७**

भवतां वाक्यानि कर्णकठोराणि शूलनिक्षिप्तानीव भवन्ति। अस्माकं राजा पुण्यात्मा।

**ब्रुवन्ति विष्णुं नृपतिं नृरूपं नृपस्य चित्रं किल विष्णुचित्रम्।८**

न: विष्णु: पृथिवीपति: इति राजानं मानवाकारं विष्णुं मन्यन्ते अत: रज्ञ: चित्रं विष्णो: चित्रंमेव! भवादृशा: मान्या: पूज्या: एवं वक्तुं नार्हन्ति।" इत्यवदन्। तदा नरेन्द्र:.

**प्राणा न चित्रस्य पटस्य सन्ति पाषाणमूर्तेरिव भोस्तथापि।**
**समर्चते राजभटैर्भवद्भि: भक्त्या प्रपत्या च गन्धमाल्यै:॥९**

चित्रपटस्य प्राणा: न सन्ति। तथापि राजभटा: भक्तियुक्ता: गन्दमाल्यादिभि: चित्रं राजानं पूज्यन्ते। इति मन्त्रिणमुक्त्वा राजानं प्रति "हे राजन्! पश्यत! भवत्सेवका: भवच्चित्रं भवत: एव पूजयन्ति खलु! ते न कदापि अवमन्यन्ते।

**आराधयन्ति प्रतिमां जना: सा साक्षात्कृतो देव इति प्रपत्य। भो विश्वमातानवितानरूपो वेविष्ट्यसौ किं प्रतिमासु नास्ति॥**१०

जना: प्रतिमायां दैवं साक्षात्कुर्वन्ति। भक्त्या प्रतिमां आराधयन्ति।
विश्वरूप: परमात्मा प्रतिमासु नास्ति? ये यं यथा भावयन्ति ते तं तथा पश्यामि। इति गीतायां भगवता उक्तं खलु। इति उपदिदेश।

**आल्वार राजा विवेकानन्दं साष्टाङ्ग प्रणाम।**

तदुपदेशं ज्ञात्वा राजा नरेन्द्रं साष्टाङ्गं प्रणिपत्य "प्रभो! मदज्ञानं क्षमस्व भवद्भ्य: मम नेत्राणि उन्मीलितानि इति संप्रार्थितवान्। नरेन्द्र: स्वपादपतितं राजानं उत्थाप्य तस्य शिरसि करं निक्षिप्य

**त्वां मर्षयेदीश्वर एव राजन् सभज्यता मित्युपदिष्टवांस्तम्।**११

हे राजन्! त्वां ईश्वर: क्षमिष्यति तं भज! इति राजानमुपदिदेश:।
उपसंहार:। एवं स्वामीविवेकानन्द: नास्तिकाज्ञान् तिमिरान्धस्य आल्वार राज्ञ: बोधन ज्ञानाञ्जनशलाकया चक्षु: उन्मीलयित्वा तद्वार प्रपञ्च गुरुपदारूढ:। तस्मै श्री गुरुमूर्तये नमस्काराञ्जलिं विधाय विरमामि।

**सन्दर्भ: श्रीसन्निधानं सूर्यनारायणशास्त्री- विवेकानन्द काव्यम्।**


१. विवेकानन्दम्- प्रतिमाराधनम्-८
२. विवेकानन्दम्- प्रतिमाराधनम्-९
३. विवेकानन्दम्- प्रतिमाराधनम्-१२
४. विवेकानन्दम्- प्रतिमाराधनम्-१४
५. विवेकानन्दम्- प्रतिमाराधनम्-१६
६. विवेकानन्दम्- प्रतिमाराधनम्-२०
७. विवेकानन्दम्- प्रतिमाराधनम्-२४
८. विवेकानन्दम्- प्रतिमाराधनम्-३०
९. विवेकानन्दम्- प्रतिमाराधनम्-३२
१०. विवेकानन्दम्- प्रतिमाराधनम्-३५
११. विवेकानन्दम्- प्रतिमाराधनम्-३८